शेष प्रश्न

साहित्य

## कादम्बरी कथामुखम्

प्र०-(16) - तारापीडस्य पुत्रः कः आसीत् ?
उत्तरम् - चन्द्रापीडः ।

प्र०-(17) - वैशम्पायनः कस्य पुत्रः आसीत् ?
उत्तरम् - शुकनाशस्य ।

प्र०(18) - पुण्डरीकः कस्यानुरक्तः आसीत् ?
उत्तरम् - महाश्वेतायाम् ।

प्र० (19) - तारापीडस्य मन्त्री कः आसीत् ?
उत्तरम् - शुकनाशः ।

प्र० (20) - चन्द्रापीडस्य अनुरागः कस्यामासीत् ?
उत्तरम् - कादम्बर्याम् ।

प्र०(21) - साम्राज्ञी विलासवती कस्य माता आसीत् ?
उत्तरम् - चन्द्रापीडस्य ।

प्र०-(22) - पुण्डरीकस्य पिता कः अस्ति ?
उत्तरम् - श्वेतकेतुः ।

प्र०(23) - पुण्डरीकस्य माता का आसीत् ?
उत्तरम् - लक्ष्मी ।

प्र०(24) - पुण्डरीकस्य अनन्यमित्रम् आसीत् ?
उत्तरम् - कपिञ्जलः ।

प्र०(25) - "पत्रलेखा" कस्य पुत्री अस्ति । ?
उत्तरम - कुलूताधिपतेः ।

प्र० (26) चन्द्रापीडस्य सेविका दूती वा का अस्ति ?
उत्तरम् - पत्रलेखा ।

प्र०(27) - किन्नरयुगलमनुसरन् चन्द्रापीडः कुत्र अगच्छ
उत्तरम् - हेमकूटम् ।

राधा उमाकान्त सं० महाविद्यालय [illegible] Devi 18/06/21
सुरखसेना, पूर्णिया ।

उपशास्त्री साहित्य - तृतीय - पत्रम
प्रथम - खण्ड किरातार्जुनीयम् महाकाव्यम् - प्रथम सर्गः

Date ___/___/_____

① प्र० पद्यमिदम् व्याख्येयम् ?

भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम् ।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितस्य कि-
रार्जुनीय महाकाव्यस्य प्रथम सर्गात समुद्धृतोऽस्ति ।
अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति क
भवादृशेषु शास्त्रज्ञेषु व्यवहारज्ञेषु च स्त्रीजनोक्तं किम
नियोजनवचनं भवतस्तिरस्कार इव भवति, तथापि शत्रु
वमाननासमुद्भूताभिर्मनोव्यथाभिरत्यन्तं क्षुब्धहृदया
धैर्यविनयशीलादिकं स्त्रीजनोचितमाचारं विहाय किञ्चिद्

व्याख्या - भवादृशाः = भवद्विधाः । पण्डिता इत्यर्थः । तेषु विषये
व्यवहारादिषु = इत्यादिनाकम । प्रमदाजनोदितम् = स्त्रीज
अनुशासनं = नियोगवचनम् । अधिक्षेपः = तिरस्का
इव भवति । तथापि = वक्तुमनुचितत्वेऽपि । यैस्ते निरस्त
समयाः = त्याजितशालीनतारूपस्त्रीसमाचाराः । दुराधयः
समयोल्लङ्घनहेतुत्वाद् दुष्टा मनोव्यथाः । मां वक्तुं = म
व्यथा, व्यवसाययन्ति = प्रेरयन्ति । न किञ्चिदयुक्तं दुःखिना
भावः ।

Renu devi
19/06/21
राधा उमा कान्त सं० महावि० सुखसेन
पूर्णिया ।

शास्त्री-I खण्ड    साहित्य - कादम्बरी कथामुखम्

कादम्बर्याः वस्तुनिष्ठ प्रश्नोत्तराणि ।

प्र० (1) - बाणभट्टस्य का गद्यशैली ?
उत्तरम् - पाञ्चाली

प्र० (2) - बाणस्य पितुः नाम किम् ?
उत्तरम् - चित्रभानुः

प्र० (3) - बाणस्य पुत्रः कः आसीत् ?
उत्तरम् - भूषणभट्टः ।

प्र० - (4) - कस्मिन् गोत्रे बाणस्य जन्म बभूव ?
उत्तरम् → वत्सगोत्रे ।

प्र० (5) - बाणविरचितम् काव्यमस्ति ?
उत्तरम् - कादम्बरी ।

प्र० (6) - बाणस्य वासः आसीत् ?
उत्तरम् - शोननदीतटे प्रीतिकूटग्रामे ।

प्र० (7) - राजवर्धनः कस्य पुत्रः आसीत् ?
उत्तरम् - बाणभट्टस्य ।

प्र० (8) - कादम्बरी कति भागेषु विभक्ता ?
उत्तरम् - चतुर्भागेषु ।

प्र० (9) - शुकनासोक्त दिशा बुद्धिः कदा कालुष्यमुपयाति ?
उत्तरम् - यौवनारम्भे ।

प्र० (10) - "बाणः" इति कस्य प्रभेदोऽस्ति ?
उत्तरम् - शस्त्रस्य ।

प्र० - (11) - "लब्धापि दुःखेन परिपाल्यते" इति कस्य कथनम् ?
उत्तरम् - शुकनाशस्य ।

प्र० - (12) - कादम्बरी ग्रन्थे कस्या कथा वर्णिताऽस्ति ?
उत्तरम् - चन्द्रापीडस्य

प्र० - (13) - कादम्बरी इति ग्रन्थे कस्य जन्म त्रयस्य वर्णनमस्ति
उत्तरम् → चन्द्रापीडस्य ।

प्र० - (14) - "गन्धर्वनगर लेखेव पश्यत एव नश्यति" कुत्रेदं वाक्यम्
उत्तरम् - कादम्बर्याम् ।

प्र० (15) - चन्द्रापीडः पूर्व जन्मो कः आसीत् ?
उत्तरम् - चन्द्रमाः ।

शेष पृष्ठ
आगे →

शास्त्री · साहित्य
प्रथम-खण्ड अभिज्ञान शाकुन्तलम्

Date __/__/__

प्र० ① – छन्दोमय्या वाण्या शकुन्तलाविषये किं सूचितम् ?

उत्तरम् – अग्निशरणं प्रविष्टस्य तातकण्वस्य शरीरं विना छन्दोमय्या वाण्या सूचितम्, यत् —

दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः ।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव ॥

प्र० ② – शकुन्तलाहेतोर्वनस्पतिभिः कानि पदार्थानि दत्तानि ?

उत्तरम् – शकुन्तलाहेतोर्वनस्पतिभिः आभरणानि दत्तानि। अथ क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं, निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित् अन्येभ्यो वनदेवता करतलैरापर्वभागोत्थितै – दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः

प्र० ③ – यास्यत्यद्य शकुन्तलेति सम्पूर्णं पद्यं लिखत ?

उत्तरम् – यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठस्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥

Renu Devi
19/06/21
राघा उमाकान्त सं० महावि० सुखसे
पूर्णिया ।

उपशास्त्री साहित्य
द्वितीय-खण्ड किरातार्जुनीयम् महाकाव्यम्
Date ___/___/___ प्रथम- सर्गः

Saathi

प्र० ① पद्यमिदम् व्याख्येयम् ?

परिभ्रमँल्लोहितचन्दनोचितः पदातिरन्तर्गिरि रेणुरूषितः ।
महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः॥

उत्तरम् — प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि प्रकाण्ड भारवि प्रणीतस्य किरातार्जुनीय महाकाव्यस्य प्रथम सर्गात् उद्धृतोऽस्ति ।

प्रस्तुत श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति रक्तचन्दनाङ्गरागाभ्यासी महारथचारी चायं भीमसेनः सम्प्रत धूलिधूसरितः सन् पदातिरेव पर्वतान्तरेषु पर्यटति, अनेनापि सत्यप्रियस्य तव मानसं न किञ्चिदपि परितप्यते किम्

व्याख्या — लोहितचन्दनोचितः = उचित लोहित चन्दनः । महारथः = रथ-चारी । अयं वृकोदरः = भीमः, रेणुरूषितः = धूलिधूसरितः । पदातिः = पादचारी । अन्तर्गिरि = गिरिष्वन्तः । परिभ्रमन् = पर्यटन्, सत्यधनस्य = सत्यमेव धनं मन्यमानस्य इति सोल्लुण्ठ-वचनम् । अद्यापि सत्यमेव रक्ष्यते न तु भ्रातर इति भावः । मानसं = चेतः, नो दुनोति कच्चित् = न परितापयति ? कच्चित् कामप्रवेदने' इत्यमरः । स्वाभिप्रायाविष्करणं कामप्रवेदनम् ।

Renu Devi
19/06/21
राधा उमाकान्त सं० महाविद्या सुखसेना,
पूर्णिया ।